दिनांक 14-10-20 उपशास्त्री द्वितीय वर्ष विषय - व्याकरण

ग्रन्थ सिद्धान्त कौमुदी (दिवादिगणः)

१ सृज्यते – सृज् धातोर्लट् लट्स्थाने तिप्तस्झि इति सूत्रेण त प्रत्यये। सार्वधातुकसंज्ञायाम्, शप्प्रबाधक दिवादिभ्यः श्यन् इति सूत्रेण श्यन् प्रत्यये अनुबन्धलोपे। टित आत्मनेपदानां टेरे इति सूत्रेण टेरेत्वे कृते सृज्यते इति सिद्धम्।

२ ससृजे – सृज् धातोर्लिट् लिट्स्थाने तिप्तस्झि इति सूत्रेण त प्रत्यये लिटस्तझयोरेशिरेच् इति सूत्रेण तकारस्य स्थाने एशादेशे अनुबन्धलोपे। लिटि धातोरनभ्यासस्य इति सूत्रेण द्वित्वे अभ्याससंज्ञायाम्। उरत् ऋकारस्य स्थाने अत्वे रपरत्वे हलादिशेषे ससृजे इति सिद्धम्।

स्रष्टा – सृज् धातोर्लुट् लुट्स्थाने तिप्तस्झि इति सूत्रेण त प्रत्यये। लुटः प्रथमस्य डारौरसः इति सूत्रेण तकारस्य स्थाने डादेशे। स्यतासी लृलुटोः इति सूत्रेण तासि प्रत्यये। डित्वसामर्थ्यात् अभस्यापि टेर्लोपः। सृजिदृशोर्झल्यमकिति इति सूत्रेण अमागमे अनुबन्धलोपे स्रअज् ता इति जाते। इको यणचि इति सूत्रेण ऋकारस्य स्थाने यणे, व्रश्चभ्रस्जसृज इति सूत्रेण जकारस्य स्थाने षत्वे ष्टुत्वे कृते स्रष्टा इति सिद्धम्।

३- नह्यति – णह् धातोर्लट् लट्स्थाने तिप्तस्झि इति सूत्रेण तिप् प्रत्यये अनुबन्धलोपे। सार्वधातुकसंज्ञायाम्, शप्प्रबाधक दिवादिभ्यः श्यन् इति सूत्रेण श्यन् प्रत्यये अनुबन्धलोपे। णो नः इति णकारस्य स्थाने नत्वे नह्यति इति सिद्धम्। तङ् पक्षे तकारस्य स्थाने टित आत्मनेपदानां टेरे इति सूत्रे नह्यते इति रूपं भवति।

५ ननाह – णह् धातोर्लिट् लिट्स्थाने तिप्तस्झि इति सूत्रेण तिप् प्रत्यये। परस्मैपदानां णल् - इति सूत्रेण तिपः स्थाने णल् आदेशे। लिटि धातोरनभ्यासस्य इति द्वित्वे, अभ्याससंज्ञायां हलादिशेषे। णो नः इति सूत्रेण णकारस्य स्थाने नत्वे उपधावृद्धौ ननाह इति सिद्धम्।

अमरनाथ मिश्र

एसो. प्रो. व्याकरण

रा.उ. सं. म. वि.

[illegible]

दिनांक 14-10-20

उपशास्त्री प्रथम वर्ष - विषय - व्याकरण

ग्रन्थ - सिद्धान्त कौमुदी

1 नैषध्यः — निषधानां देशविशेषाणां राजा इति विग्रहे निषध शब्दात् कुरुनादिभ्यो ण्यः इति सूत्रेण ण्य प्रत्यये अनुबन्ध लोपे तद्धितेष्वचामादेः इति सूत्रेण वृद्धौ, अन्त्यलोपे कृते। प्रातिपदिक संज्ञायां विभक्ति कार्ये।

2 इक्ष्वाकवः - इक्ष्वाकूणां जनपदविशेषाणां राजानः इति विग्रहे जनपद शब्दात् क्षत्रियाद् अञ् इति सूत्रेण अञ् प्रत्यये। तद्धितेष्वचामादेः इति वृद्धौ उकारस्य स्थाने गुणे अवादेशे ऐक्ष्वाकव इति दशायां तद्राजस्य बहुषु तेनैवास्त्रियाम् इति सूत्रेण अञ् प्रत्ययस्य लुक्। अत एव आदि वृद्धि निवृत्तिः। इक्ष्वाकु शब्दादेव प्रातिपदिक संज्ञायां विभक्ति कार्ये इक्ष्वाकवः इति सिद्धम्।

3 कम्बोजः - कम्बोजानां देशविशेषाणां राजा इति विग्रहे कम्बोज शब्दात् जनपद शब्दात् क्षत्रियाद् अञ् इति सूत्रेण अञ् प्रत्यये, अनुबन्ध लोपे। तद्धितेष्वचामादेः इति वृद्धौ काम्बोज इति दशायां कम्बोजात् लुक् इति सूत्रेण अञ प्रत्ययस्य लुक्। लुक् निमित्तक वृद्धि निवृत्तिः। कम्बोज शब्दादेव प्रातिपदिक संज्ञायां विभक्ति कार्ये। कम्बोजः इति सिद्धम्।

4 चोलः — चोलानां क्षत्रिय विशेषाणां राजा इति विग्रहे द्व्यञ्मगध -- इति सूत्रेण अण् प्रत्यये, तद्धितेष्वचामादेः इति वृद्धौ चौल इति दशायाम् कम्बोजादिभ्यः इति वाच्यम् इति वार्तिकेन अणो लुक्, लुक् विधान सामर्थ्यात् वृद्धिर्निवृत्तिः चोल शब्दादेव प्रत्ययः। प्रातिपदिक संज्ञायां विभक्ति कार्ये। चोलः इति

अमरनाथ मिश्र
ए० प्रो० व्याकरण
रा० उ० सं० म० वि
सुलबेना पूर्णिया

दिनांक 14-10-20 शास्त्री द्वितीय खण्ड विषय अनि० व्याकरण
ग्रन्थ लघुसिद्धान्त कौमुदी (समास प्र०

शङ्कुलाखण्डः — शङ्कुलया खण्डः इति लौकिक विग्रहे शङ्कुला-टा खण्ड सु इति अलौकिक विग्रहे तृतीया तत्कृतार्थेन गुणवचनेन इति सूत्रेण समासे कृते । प्रथमा निर्दिष्टं समास उपसर्जनम् इति मान्तत्वात् प्रथमा निर्दिष्ट समासे उपसर्जनम् इति सूत्रेण उपसर्जन संज्ञायाम्, उपसर्जनं पूर्वम् इति सूत्रेण पूर्वनिपाते । सुपो धातु प्रातिपदिकयोः इति सूत्रेण सुब्लुकि । प्रातिपदिक संज्ञायाम् विभक्ति कार्ये ।

2 हरित्रातः – हरिणा त्रातः इति लौकिक विग्रहे हरि-टा त्रात सु इति अलौकिक विग्रहे कर्तृ करणे कृता बहुलम् इति सूत्रेण समासे, समासत्वात् प्रातिपदिक संज्ञायाम् सुब्लुकि । विभक्ति कार्ये हरित्रातः इति सिद्धम् ।

3 भूतबलिः – भूताय बलिः इति लौकिक विग्रहे अर्थेन नित्य समासो विशेष्यलिङ्गता चेति वक्तव्यम् इति वार्तिकेन चतुर्थी तत्पुरुष समासे कृते । समासत्वात् प्रातिपदिक संज्ञायाम् सुब्लुकि विभक्ति कार्ये भूतबलिः इति सिद्धम् ।

4 स्तोकान्मुक्तः – अत्र स्तोकान्तिक दूरार्थ कृच्छ्राणि क्तेन इति सूत्रेण पञ्चमी समासे । समासत्वात् प्रातिपदिक संज्ञायां सुब्लुकि प्राप्ते पञ्चम्याः स्तोकादिभ्यः इति सूत्रेण पञ्चम्या अलुक । प्रातिपदिक संज्ञायां विभक्ति कार्ये ।

5 पूर्वकायः – पूर्वं कायस्य इति लौकिक विग्रहे, पूर्व अम् काय ङस् इति अलौकिक विग्रहे पूर्वापराधरोत्तरम् एकदेशिनैकाधिकरणे इति सूत्रेण एकदेशि समासे प्रथमान्तत्वात् उपसर्जन संज्ञायां पूर्वनिपाते, प्रातिपदिक संज्ञायाम् विभक्ति कार्ये ।

अमरनाथ मिश्र
एसो० प्रो० व्याकरण
रा० उ० सं० म० वि०
सुलतना पूर्णिया